# Bharatavarshanukirtanam in Brahmapurana

# બ્રહ્મપુરાણાન્તર્ગતે ભારતવર્ષાનુકીર્તનમ્

## Document Information

Text title : Bharatavarshanukirtanam in Brahmapurana

File name : bhAratavarShAnukIrtanambrahmapurANa.itx

Category : misc

Location : doc_z_misc_general

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : brahmapurANam . svayambhvRRiShisaMvAde

Latest update : November 19, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2023

*sanskritdocuments.org*

# બ્રહ્મપુરાણાન્તર્ગતે ભારતવર્ષાનુકીર્તનમ્

બ્રહ્મોવાચ -
શ ृણુધ્વં મુનયઃ સર્વે યદ્વો વક્ષ્યામિ સામ્પ્રતમ્ ।
પુરાણં વેદસમ્બદ્ધં ભુક્તિમુક્તિપ્રદં શુભમ્ ॥ ૧॥

પૃથિવ્યાં ભારતં વર્ષં કર્મભૂમિરુદાહૃતા ।
કર્મણઃ ફલભૂમિશ્ચ સ્વર્ગં ચ નરકં તથા ॥ ૨॥

તસ્મિન્વર્ષે નરઃ પાપં કૃત્વા ધર્મં ચ ભો દ્વિજાઃ ।
અવશ્યં ફલમાપ્નોતિ અશુભસ્ય શુભસ્ય ચ ॥ ૩॥

બ્રાહ્મણાદ્યાઃ સ્વકં કર્મ કૃત્વા સમ્યક્સુસંયતાઃ ।
પ્રાપ્નુવન્તિ પરાં સિદ્ધિં તસ્મિન્વર્ષે ન સંશયઃ ॥ ૪॥

ધર્મં ચાર્થં ચ કામં ચ મોક્ષં ચ દ્વિજસત્તમાઃ ॥

પ્રાપ્નોતિ પુરુષઃ સવૈ તસ્મિન્વર્ષે તુ સંયતઃ ॥ ૫॥

ઇન્દ્રાદ્યાશ્ચ સુરાઃ સર્વે તસ્મિન્વર્ષે દ્વિજોત્તમાઃ ।
કૃત્વા સુશોભનં કર્મ દેવત્વં પ્રતિપેદિરે ॥ ૬॥

અન્યેઽપિ લેભિરે મોક્ષં પુરુષાઃ સંયતેન્દ્રિયાઃ ।
તસ્મિન્વર્ષે બુધાઃ શાન્તા વીતરાગા વિમત્સરાઃ ॥ ૭॥

યે ચાપિ સ્વર્ગે તિષ્ઠન્તિ વિમાનેન ગત જ્વરાઃ ।
તેઽપિ કૃત્વા શુભં કર્મ તસ્મિન્વર્ષે દિવં ગતાઃ ॥ ૮॥

નિવાસં ભારતે વર્ષ આકાઙ્ક્ષન્તિ સદા સુરાઃ ।
સ્વર્ગાપવર્ગફલદે તત્પશ્યામઃ કદા વયમ્ ॥ ૯॥

મુનય ઊચુઃ -
યદેતદ્ભવતા પ્રોક્તં કર્મ નાન્યત્ર પુણ્યદમ્ ।
પાપાય વા સુરશ્રેષ્ઠ વર્જયિત્વા ચ ભારતમ્ ॥ ૧૦॥

તતઃ સ્વર્ગશ્ચ મોક્ષશ્ચ મધ્યમં તચ્ચ ગમ્યતે ।
ન વાન્યત્ર ચ મર્ત્યાનાં ભૂમૌ કર્મ વિધીયતે ॥ ૧૧॥

તસ્માદ્વિસ્તરતો બ્રહ્મન્નસ્માકં ભારતં વદ ।
યદિ તેહિ દયાઽસ્માસુ યથાવસ્થિતિરેવ ચ ॥ ૧૨॥

તસ્માદ્વર્ષમિદં નાથ યે વાઽસ્મિન્વર્ષપર્વતાઃ ।
ભેદાશ્ચ તસ્ય વર્ષસ્ય બ્રૂહિ સર્વાનશેષતઃ ॥ ૧૩॥

બ્રહ્મોવાચ -
શ્ૃણુધ્વં ભારતં વર્ષં નવભેદેન ભો દ્વિજાઃ ।
સમુદ્રાન્તરિતા જ્ઞેયાસ્તે સમાશ્ચ પરસ્પરમ્ ॥ ૧૪॥

ઇન્દ્રદ્વીપઃ કશેરુશ્ચ તામ્રવર્ણો ગભસ્તિમાન્ ।
નાગ દ્વીપસ્તથા સૌમ્યો ગાન્ધર્વો વારુણસ્તથા ॥ ૧૫॥

અયં તુ નવમસ્તેષાં દ્વીપઃ સાગરસંવૃતઃ ।
યોજનાનાઞ્ચ સાહસ્રં દ્વીપોઽયં દક્ષિણોત્તરઃ ॥ ૧૬॥

પૂર્વે કિરાતા યસ્યાઽઽસન્પશ્ચિમે યવનાસ્તથા ।
બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શુદ્ધાશ્ચાત્ર સ્થિતા દ્વિજાઃ ॥ ૧૭॥

ઇજ્યાયુદ્ધવણિજ્યાદ્યૈઃ કર્મભિઃ કૃતપા વનાઃ ।
તેષાં સદ્વ્યવહારશ્ચ એભિઃ કર્મભિરિષ્યતે ॥ ૧૮॥

સ્વર્ગાપવર્ગહેતુશ્ચ પુણ્યં પાપં ચ વૈ તથા ।
મહેન્દ્રો મલયઃ સહ્યઃ શુક્તિમાનૃક્ષપર્વતઃ ॥ ૧૯॥

વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તૈવાત્ર કુલાચલાઃ ।
તેષાં સહસ્રશશ્ચાન્યે ભૂધરા યે સમીપગાઃ ॥ ૨૦॥

વિસ્તારોચ્છ્રયિણો રમ્યા વિપુલાશ્ચિત્રસાનવઃ ।
કોલાહલઃ સ વૈભ્રાજો મન્દરો દર્દલાચલઃ ॥ ૨૧॥

વાતાધ્વગો દૈવતશ્ચ મૈનાકઃ સુરસસ્તથો ।
તુઙ્ગપ્રસ્થો નાગગિરિર્ગોધનઃ પાણ્ડુરાચલઃ ॥ ૨૨॥

પુષ્પગિરિર્વૈજયન્તો રૈવતોઽર્બુદ એવ ચ ।
ઋષ્યમૂકસ્તુ ગોમન્થઃ કૃતશૈલઃ કૃતાચલઃ ॥ ૨૩॥

શ્રીપર્વતશ્ચકોરશ્ચ શતશોઽન્યે ચ પર્વતાઃ ॥

તૈર્વિમિશ્રા જનપદા મ્લેચ્છાદ્યાશ્ચૈવ ભાગશઃ ॥ ૨૪॥

તૈઃ પીયન્તે સરિચ્છ્રેષ્ઠાસ્તા બુધ્યધ્વં દ્વિજોત્તમાઃ ।
ગઙ્ગા સરસ્વતી સિન્ધુશ્ચન્દ્રભાગા તથાઽપરા ॥ ૨૫॥

યમુના શતદ્રુર્વિપાશા વિતસ્તૈરાવતી કુહૂઃ ।
ગોમતી ધૂતપાપા ચ બાહુદા ચ દૃષદ્વતી ॥ ૨૬॥

વિપાશા દેવિકા ચક્ષુર્નિષ્ઠીવા ગણ્ડકી તથા ।
કૌશિકી ચાઽઽપગા ચૈવ હિમવત્પાદનિઃસૃતાઃ ॥ ૨૭॥

દેવસ્મૃતિર્દેવવતી વાતઘ્ની સિન્ધુરેવ ચ ।
વેણ્યા તુ ચન્દના ચૈવ સદાનીરા મહી તથા ॥ ૨૮॥

ચર્મણ્વતી વૃષી ચૈવ વિદિશા વેત્રવત્યપિ ।
શિપ્રા દ્રવન્તી ચ તથા પારિયાત્રાનુગાઃ સ્મૃતાઃ ॥ ૨૯॥

શોણા મહાનદી ચૈવ નર્મદા સુરથા ક્રિયા ।
મન્દાકિની દશાર્ણા ચ ચિત્રકૂટા તથાઽપરા ॥ ૩૦॥

ચિત્રોત્પલા વેત્રવતી કરમોદા પિશાચિકા ।
તથાઽન્યાઽતિલઘુશ્રોણી વિપાશા શૈવલા નદી ॥ ૩૧॥

સમેરુજા શક્તિમતી શકુની ત્રિદિવા ક્રમુઃ ।
ઋતપાદપ્રસૂતા વૈ તથાઽન્યા વેગવાહિની ॥ ૩૨॥

શિપ્રા પયોષ્ણી નિર્વિન્ધ્યા તાપી ચૈત્ર સરિદ્વરા ।
વેણા વૈતરણી ચૈત્ર સિનીવાલી કુમુદ્વતી ॥ ૩૩॥

તોયા ચૈવ મહાગૌરી દુર્ગા ચાન્તઃશિલા તથા ।
વિન્ધ્યપાદ પ્રસૂતાસ્તા નદ્યઃ પુણ્યજલાઃ શુભાઃ ॥ ૩૪॥

ગોદાવરી ભીમરથી કૃષ્ણવેણા તથાઽઽપગા ।
તુઙ્ગભદ્રા સુપ્રયોગા તથાઽન્યા પાપનાશિની ॥ ૩૫॥

સહ્યપાદ વિનિષ્ક્રાન્તા ઇત્યેતાઃ સરિતાં વરાઃ ।
કૃતમાલા તામ્રપર્ણી પુષ્પવત્યુપલાવતી ॥ ૩૬॥

મલયાદિસમુદ્ભૂતાઃ પુણ્યાઃ શીતજલાસ્ત્વિમાઃ ।
પિતૃસોમર્ષિ કુલ્યા ચ વઞ્જુલા ત્રિદિવા ચ યા ॥ ૩૭॥

લાઙ્ગલિની વંશકરા મહેન્દ્રપ્રભવાઃ સ્મૃતાઃ ।
સુવિકાલા કુમારી ચ મનુગા મન્દગામિની ॥ ૩૮॥

ક્ષયા પલાશિની ચૈવ શુક્તિમત્પ્રભવાઃ સ્મૃતાઃ ।
સર્વાઃ પુણ્યાઃ સરસ્વત્યઃ સર્વા ગઙ્ગાઃ સમુદ્રાઃ ॥ ૩૯॥

વિશ્વસ્ય માતરઃ સર્વાઃ સર્વાઃ પાપહરાઃ સ્મૃતાઃ ।
અન્યાઃ સહસ્રશઃ સન્તિ ક્ષુદ્રનદ્યો દ્વિજોત્તમાઃ ॥ ૪૦॥

પ્રાવૃટ્કાલવહાઃ સન્તિ સદા કાલવહાશ્ચ યાઃ ।
મત્સ્યાઃ કુમુદમાલ્યાશ્ચ ઋતુલાઃ કાશિકોશલાઃ ॥ ૪૧॥

(મત્સ્યા મુકુટકુલ્યાશ્ચ કુન્તલા કાશિકોશલાઃ) ॥ ૪૧॥

અન્ધકાશ્ચ કલિઙ્ગાશ્ચ મશકાશ્ચ વૃકૈઃ સહ ।
મધ્યદેશા જનપદાઃ પ્રાયશોઽમી પ્રકીર્તિતાઃ ॥ ૪૨॥

સહ્યસ્ય ચોત્તરે યસ્તુ યત્ર ગોદાવરી નદી ।
પૃથિવ્યામપિ કૃત્સ્નાયાં સ પ્રદેશો મનોરમઃ ॥ ૪૩॥

ગોવર્ધનપુરં રમ્યં ભાર્ગવસ્ય મહાત્મનઃ ।
વાહીકરાટધાનાશ્ચ સુતીરાઃ કાલતોયદાઃ ॥ ૪૪॥

અપરાન્તાશ્ચ શૂદ્રાશ્ચ બાહિકાશ્ચ સકેરલાઃ ।
ગાન્ધારા યવનાશ્ચૈવ સિન્ધુસૌવીરમદ્રકાઃ ॥ ૪૫॥

શતગુહાઃ કલિઙ્ગાશ્ચ પારદા હરિભૂષિકાઃ ।
માઠરાશ્ચૈવ કનકાઃ કૈકેયા દમ્ભમાલિકાઃ ॥ ૪૬॥

ક્ષત્રિયોપદે શાશ્ચ વૈશ્યશૂદ્રકુલાનિ ચ ।
કામ્બોજાશ્ચૈવ વિપ્રેન્દ્રા બર્બરાચ સલૌકિકાઃ ॥ ૪૭।
વીરાશ્ચૈવ તુષારાશ્ચ પહ્લવાધાયતા નરાઃ ।
આત્રેયાશ્ચ ભરદ્વાજાઃ પુષ્કલાશ્ચ દશેરકાઃ ॥ ૪૮॥

લમ્પકાઃ શુનશોકાશ્ચ કુલિકા જાઙ્ગલૈઃ સહ ।
ઔષધ્યશ્ચલચન્દ્રાશ્ચ કિરાતાનાં ચ જાતયઃ ॥ ૪૯॥

તોમરા હંસમાર્ગાશ્ચ કાશ્મીરાઃ કરુણાસ્તથા ।
શૂલિકાઃ કુહકાશ્ચૈવ માગધાશ્ચ તથૈવ ચ ॥ ૫૦॥

એતે દેશા ઉદીચ્યાસ્તુ પ્રાચ્યાન્દેશાન્નિબોધત ॥

અન્ધા વામઙ્કુરાકાશ્ચ વલ્લકાશ્ચ મખાન્તકાઃ ॥ ૫૧॥

તથાઽપરેઽઙ્ગા વઙ્ગાશ્ચ મલદા માલવર્તિકાઃ ।
ભદ્રતુઙ્ગાઃ પ્રતિજયા ભાર્યાઙ્ગાશ્ચાપમર્દકાઃ ॥ ૫૨॥

પ્રાગ્જ્યોતિષાશ્ચ મદ્રાશ્ચ વિદેહાસ્તામ્રલિપ્તકાઃ ।
મલ્લા મગધકા નન્દાઃ પ્રાચ્યા જનપદાસ્તથા ॥ ૫૩॥

અથાપરે જનપદા દક્ષિણાપથવાસિનઃ ॥

પૂર્ણાશ્ચ કેવલાશ્ચૈવ ગોલાઙ્ગૂલાસ્તથૈવ ચ ॥ ૫૪॥

ઋષિકા મુષિકાશ્ચૈવ કુમારા રામઠાઃ શકાઃ ।
મહારાષ્ટ્રા માહિષકાઃ કલિઙ્ગાશ્ચૈવ સર્વશઃ ॥ ૫૫॥

આભીરાઃ સહ વૈશિક્યા અટવ્યાઃ સરવાશ્ચ યે ।
પુલિન્દાશ્ચૈવ મૌલેયા વૈદર્ભા દણ્ડકૈઃ સહ ॥ ૫૬॥

પૌલિકા મૌલિકાશ્ચૈત્ર અશ્મકા ભોજવર્ધનાઃ ।
કૌલિકાઃ કુન્તલાશ્ચૈવ દમ્ભકા નીલકાલકાઃ ॥ ૫૭॥

દાક્ષિણાત્યાસ્ત્વમી દેશા હ્યપરાન્તાન્નિબોધત ।
શૂર્પારકાઃ કાલિધના લોલાસ્તાલકટૈઃ સહ ॥ ૫૮॥

ઇત્યેતે હ્યપરાન્તાશ્ચ શ઼ૃણુધ્વં વિન્ધ્યવાસિનઃ ।
મલજાઃ કર્કશાશ્ચૈવ મેલકાશ્ચોકૈઃ સહ ॥ ૫૯॥

ઉત્તમાર્ણા દશાર્ણાશ્ચ ભોજાઃ કિષ્કિન્ધકૈઃ સહ ।
તોષલાઃ કોશલાશ્ચૈવ ત્રૈપુરા વૈદિશાસ્તથા ॥ ૬૦॥

તુમ્બુરાસ્તુ ચરાશ્ચૈવ યવનાઃ પવનૈઃ સહ ।
અભયા રુણ્ડિકેરાશ્ચ ચર્ચરા હોત્રધર્તયઃ ॥ ૬૧॥

એતે જનપદાઃ સર્વે તત્ર વિન્ધ્યનિવાસિનઃ ।
અતો દેશાન્પ્રવક્ષ્યામિ પર્વતાશ્રયિણશ્ચ યે ॥ ૬૨॥

નીહારાસ્તુષમાર્ગાશ્ચ કુરવસ્તુઙ્ગણાઃ ખસાઃ ।
કર્ણપ્રાવરણાશ્ચૈવ ઊર્જા દર્ઘાઃ સકુચ્ચકાઃ ॥ ૬૩॥

ચિત્રમાર્ગા માલવાશ્ચ કિરાતાસ્તોમરૈઃ સહ ।

કૃતત્રેતા દિકશ્ચાત્ર ચતુર્યુગકૃતો વિધિઃ ॥ ૬૪॥

એવં તુ ભારતં વર્ષ નવસંસ્થાનસંસ્થિતમ્ ।
દક્ષિણે પરતો યસ્ય પૂર્વે ચૈવ મહોદધિઃ ॥ ૬૫॥

હિમવાનુત્તરેણાસ્ય કાર્મુકસ્ય યથા ગુણઃ ।
તદેતદ્ભારતં વર્ષ સર્વબીજં દ્વિજોત્તમાઃ ॥ ૬૬॥

બ્રહ્મત્વમમરેશત્વં દેવત્વં મરુતાં તથા ।
મૃગયક્ષાપ્સરોયાનિં તદ્વત્સર્પ સરીસૃપાઃ ॥ ૬૭॥

સ્થાવરણાં ચ સર્વેષામિતો વિપ્રાઃ શુભાશુભૈઃ ।
પ્રયાન્તિ કર્મભૂર્વિપ્રા નાન્યા લોકેષુ વિદ્યતે ॥ ૬૮॥

દેવાનામપિ ભો વિપ્રાઃ સદૈવૈષ મનોરથઃ ।
ભારતં ભવમાપ્સ્યામો દેવત્વાત્પ્રચ્યુતાઃ ક્ષિતૌ ॥ ૬૯॥

માનુષ્યં કુરુતે યત્તુ તન્ન શક્યં સુરાસુરૈઃ ।
તત્કર્મ નિરતૈસ્તૈસ્તુ તત્કર્મક્ષપણોન્મુખૈઃ ॥ ૭૦॥

ન ભારતસમં વર્ષં પૃથિવ્યામસ્તિ ભો દ્વિજાઃ ।
યત્ર વિપ્રાદયો વર્ણાઃ પ્રાપ્નુવન્ત્યાભિવાઞ્છિતમ્ ॥ ૭૧॥

ધન્યાસ્તે ભારતે વર્ષે જાયન્તે યે નરોત્તમાઃ ।
ધર્માર્થકામમોક્ષાણાં પ્રાપ્નુવન્તિ મહાફલમ્ ॥ ૭૨॥

પ્રાપ્યતે યત્ર તપસઃ ફલં પરમદુર્લભમ્ ।
સર્વદાનફલં ચૈવ સર્વ યજ્ઞફલં તથા ॥ ૭૩॥

તીર્થયાત્રાફલં સમ્યક્ ગુરુસેવાફલં તથા ।
દેવતારાધનફલં ગાર્હસ્થ્યે ચૈવ યત્ફલમ્ ॥ ૭૪॥

યત્ર દેવાઃ સદા હૃષ્ટા જન્મ વાઞ્છન્તિ શોભનમ્ ।
નાનાવતફલં ચૈવ નાનાશાસ્ત્રફલં તથા ॥ ૭૫॥

અહિંસાદિફલં સમ્યક્ફલં સર્વાભિવાઞ્છિતમ્ ।
બ્રહ્મચર્યફલં ચૈવ સ્વાધ્યાયેન ચ યત્ફલમ્ ॥ ૭૬॥

યત્ફલં વનવાસેન સંન્યાસેન ચ યત્ફલમ્ ।
ઇષ્ટાપૂર્તફલં ચૈવ તથાઽન્યચ્છુભકર્મણામ્ ॥ ૭૭॥

પ્રાપ્યતે ભારતે વર્ષે ન ચાન્યત્ર દ્વિજોત્તમાઃ ।
કઃ શક્નોતિ ગુણાન્વક્તું ભારતસ્યાખિલાન્દ્વિજાઃ ॥ ૭૮॥

એવં સમ્યઙ્મયા પ્રોક્તં ભારતં વર્ષમુત્તમમ્ ।
સર્વપાપહરં પુણ્યં ધન્યં બુદ્ધિવિવર્ધનમ્ ॥ ૭૯॥

ય ઇદં શૃણુયાન્નિત્યં જપેદ્વા નિયતેન્દ્રિયઃ ।
સર્વપાપૈર્વિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૮૦॥

॥ ઇતિ બ્રહ્મપુરાણે ભારતવર્ષાનુકીર્તનમ્ ॥

॥ બ્રહ્મપુરાણમ્ । સ્વયમ્ભ્વૃષિસંવાદે ભારતવર્ષાનુકીર્તનમ્ ॥

(ભારતખણ્ડપ્રાશસ્ત્યર્ણનમ્, તત્સ્થગિરિનદીનાં વર્ણનમ્,
તદન્તર્ગતાનાનાવિધદેશવર્ણનમ્, તન્માહાત્મ્યફલકથનઞ્ચ)

.. brahmapurANam . svayambhvRRiShisaMvAde bhAratavarShAnukIrtanam ..

(bhAratakhaNDaprAshastyarNanam, tatsthagirinadInAM varNanam,
tadantargatAnAnAvidhadeshavarNanam, tanmAhAtmyaphalakathanancha)

Notes:

Brahma Purāṇa બ્રહ્મ પુરાણ; in this chapter has the description about Bhāratavarṣa ભારતવર્ષ as one of it's subcontinent that is constituted of Nine Parts viz. Indradvīpa ઇન્દ્રદ્વીપ, Kaśerumān કશેરુમાન્, Tāmraparṇa તામ્રપર્ણ, Gabhasti ગભસ્તિ, Saumya સૌમ્ય, Gāndharva ગાન્ધર્વ, Varuṇa વરુણ, Nāga નાગ, and Bhārata ભારત. Seven Principal Mountain Ranges, i.e. Kulaparvata કુલપર્વત include: Mahendra મહેન્દ્ર, Malaya મલય, Sahya સહ્ય, Śuktimata શુક્તિમત, Ṛkṣa ઋક્ષ, Vindhya વિન્ધ્ય, Pāriyātra પારિયાત્ર. Several regions, climes, rivers and their tributaries are outlined.

The chapter numbering in the referenced publications varies.

Encoded and proofread by Ruma Dewan

*Bharatavarshanukirtanam in Brahmapurana*

pdf was typeset on November 21, 2023

Please send corrections to *sanskrit@cheerful.com*